# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – आचार्य – २ | प्रश्नपत्रम् – २ | गुणाः – ५० |
| विषयः – पुराणेतिहासः | सत्रम् – ४ | समयः – १० तः १२ |
| दिनाङ्कः – १४/०७/२०२१ | सन्दर्भग्रन्थः – महाभारतम् कर्णपर्व (कतिपयाध्यायाः) | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत ।**

१ युधिष्ठिरस्य वचनं मा युद्ध्यस्वेति सर्वदा ।
दुर्योधनो नाभ्यगृह्णान्मूढः पथ्यमिवौषधम् ॥
२ आरुरोह रथं चापि सुतपुत्रप्रतापितः ।
निःश्वसन् दुःखसन्तप्तः कुम्भस्य इव पन्नगः ॥
३ अथ सात्यकिमुत्सृज्य त्वरन् कर्णोऽर्जुनं त्रिभिः ।
विद्ध्वा विव्याध विंशत्या कृष्णं पार्थं पुनः पुनः ॥
४ विलोहिताय रुद्राय नीलग्रीवाय शूलिने ।
अमोघाय मृगाक्षाय प्रवरायुधयोधिने ॥

**प्रश्नः २** अश्वत्थाम्नः प्रस्तावः कर्णस्य सेनापतित्वेन च नियुक्तिः यथाग्रन्थं वर्णयत ।

**प्रश्नः ३** कर्णवधप्रसङ्गं यथाग्रन्थं वर्णयत ।

**प्रश्नः ४** त्रिपुरवधोपाख्यानं ग्रन्थानुसारं लिखत ।

**प्रश्नः ५** कर्णस्य आत्मप्रशंसा एवं शल्येन कृतोपहासः लिखत ।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या ।**

१ त्रिशूलमाश्रित्य सुतीक्ष्णधारं सर्वाणि गात्राणि विघर्षिसि त्वम् ।
सुतीक्ष्णधारोपमकर्मणा त्वं युयुत्ससे योऽर्जुनेनाद्य कर्ण ॥
२ तस्मात् बिभेमि बलवद् ब्राह्मणव्याहृतादहम् ।
एते हि सोमराजान ईश्वराः सुखदुःखयोः ॥

३ कर्णोऽपि निशितैर्बाणैर्विनिहत्य महाचमूम् ।
प्रमृद्य च रथश्रेष्ठान् युधिष्ठिरमपीडयत् ॥

४ श्वेताश्वौ पुरुषौ दिव्यावास्थितावरिमर्दनौ ।
शुशुभाते महात्मानौ चन्द्रादित्यौ यथा दिवि ॥

**प्रश्नः ७** हंसकाकयोः उपाख्यानं यथाग्रन्थं लिखत ।

**प्रश्नः ८** कर्णार्जुनयोः पराक्रमवर्णनं लिखत ।

**प्रश्नः ९** कर्णभीमसेनयोः युद्धवर्णनं यथाग्रन्थं वर्णयत ।

**प्रश्नः १०** कर्णेन पाण्डवसेनायाः कृतः संहारः यथाग्रन्थं वर्णयत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ शल्यः कस्य देशस्य राजा अस्ति ?
२ कर्णपर्वणि कति अध्यायाः सन्ति ?
३ 'राधेय' कस्य नामास्ति ?
४ 'स्थाणुः' अर्थात् कः ?
५ इन्द्रस्य सारथिः कः वर्तते ?
६ कर्णाय कः श्रापम् अददत् ?
७ भानुसेनः कः अस्ति ?
८ दुर्योधनः शल्येन सह कस्य तुलनाम् अकरोत् ?
९ दिव्यास्त्राणि कः कस्मै ददाति स्म ?
१० अर्जुनं प्रति अपमानजनकक्रोधपूर्णवचनानि कः वदति स्म ?
११ कर्णस्य पुत्रः कः ?
१२ दानवीरः कः ?
१३ उलूकेन सह कः युद्धमकरोत् ?
१४ पाञ्चालसेनायाः संहारं कः अकरोत् ?
१५ 'कर्णपर्व' महाभारतस्य कस्मिन् खण्डे अस्ति ?

****